শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীব্রহ্মপুরাণে ব্রহ্মনারদসংৱাদে

# ॥ শ্রী নৃসিংহদ্বাদশনামস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী নৃসিংহদ্ৱাদশনামস্তোত্রম্ ॥

অস্য শ্রীনৃসিংহদ্ৱাদশনামস্তোত্রমহামন্ত্রস্য
ৱেদৱ্যাসো ভগৱান্ ঋষিঃ
অনুষ্টুপ্ ছন্দঃ
শ্রীলক্ষ্মীনৃসিংহো দেৱতা
শ্রীলক্ষ্মীনৃসিংহপ্রীত্যর্থে জপে ৱিনিযোগঃ ॥

প্রথমং তু মহাজ্ৱালো দ্ৱিতীযং তূগ্রকেসরী।
তৃতীযং ৱজ্রদংষ্ট্রশ্চ চতুর্থং তু ৱিশারদঃ ॥ **1** ॥

পঞ্চমং নারসিংহশ্চ ষষ্ঠঃ কশ্যপমর্দনঃ।
সপ্তমো যাতুহন্তা চ অষ্টমো দেৱৱল্লভঃ ॥ **2** ॥

নৱ প্রহ্লাদৱরদো দশমোঽনন্তহস্তকঃ।
একাদশো মহারুদ্রো দ্ৱাদশো দারুণস্তথা ॥ **3** ॥

দ্ৱাদশৈতানি নামানি নৃসিংহস্য মহাত্মনঃ।
মন্ত্ররাজেতি ৱিখ্যাতং সর্ৱপাপৱিনাশনম্ ॥ **4** ॥

ক্ষযাপস্মারকুষ্ঠাদিতাপজ্ৱরনিৱারণম্।
রাজদ্ৱারে মহাঘোরে সঙ্গ্রামে চ জলান্তরে ॥ **5** ॥

গিরিগহ্ৱর আরণ্যে ৱ্যাঘ্রচোরামযাদিষু।
রণে চ মরণে চৈৱ শমদং পরমং শুভম্ ॥ **6** ॥

শতমাৱর্তযেদ্যস্তু মুচ্যতে ৱ্যাধিবন্ধনাৎ।
আৱর্তযেৎসহস্রং তু লভতে ৱাঞ্ছিতং ফলম্॥ 7॥

॥ ইতি শ্রী নৃসিংহদ্বাদশনামস্তোত্রং সমাপ্তম্॥